# वैयाकरणसिद्धान्तकौमुदी

## हलन्तपुंलिङ्गप्रकरणम् (१८)

०१.११.२०११

# ३८२. ङेप्रथमयोरम् (७.१.२८)

- पदद्वयम् । ङे-प्रथमयोः, अम् ।
- 'युष्मदस्मद्भ्याम् ङसोऽश्' (७.१.२७) इत्यतः 'युष्मदस्मद्भ्याम्' इति अनुवर्तते ।
- युष्मदस्मद्भ्याम् परस्य ङे इत्यस्य प्रथमाद्वितीययोश्च अमादेशः स्यात् ।

- युष्मद् (सुँ) स्                    अस्मद् (सुँ) स्
- युष्मद्   अम्        ('ङेप्रथमयोरम्')  अस्मद्        अम्

# ३८३. मपर्यन्तस्य (७.२.९१)

- एकपदात्मकं सूत्रम् ।
- इत्यधिकृत्य ।

# ३८४. त्वाहौ सौ (७.२.९४)

- पदद्वयम् । त्व-अहौ, सौ ।
- 'युष्मदस्मदोरनादेशे' (७.२.८६) इत्यतः 'युष्मदस्मदोः' इति अनुवर्तते, 'मपर्यन्तस्य' (७.२.९१) इति अधिक्रियते ।
- युष्मदस्मदोः मपर्यन्तस्य त्व अह इत्येतौ आदेशौ स्तः सौ परे ।

- युष्मद् अम् — अस्मद् अम्
- त्व अद् अम् ('त्वाहौ सौ') — अह अद् अम्

# ३८५. शेषे लोपः (७.२.९०)

- पदद्वयम् । शेषे, लोपः ।
- 'अष्टन आ विभक्तौ' (७.२.८४) इत्यतः 'विभक्तौ' इति, 'युष्मदस्मदोरनादेशे' (७.२.८६) इत्यतः 'युष्मदस्मदोः' इति च अनुवर्तते ।
- उक्तादन्यः शेषः ।
- 'युष्मदस्मदोरनादेशे' (७.२.८६) इति, 'द्वितीयायां च' (७.२.८७) इति, 'प्रथमायाश्च द्विवचने भाषायाम्' (७.२.८८) इति च आत्वं विहितम्, 'योऽचि' (७.२.८९) इति यत्वं च ।
- आत्व-यत्व-निमित्तेतरविभक्तौ परतः युष्मदस्मदोः अन्त्यस्य लोपः स्यात् ।

| | | |
|---|---|---|
| त्व अद् अम् | | अह अद् अम् |
| त्व अ अम् | (‘शेषे लोपः’) | अह अ अम् |
| त्व अम् | (‘अतो गुणे’) | अह अम् |
| त्वम् | (‘अमि पूर्वः’) | अहम् |

- ननु 'त्वं स्त्री', 'अहं स्त्री' इत्यत्र 'त्व अम्', 'अह अम्' इति स्थिते, अमि पूर्वरूपं परमपि बाधित्वा अन्तरङ्गत्वात् टाप् प्राप्नोति ।
- युष्मद् (सु) स्
- युष्मद् अम् ('ङेप्रथमयोरम्' - ७.१.२८)
- त्व अद् अम्('त्वाहौ सौ' - ७.२.९४)
- त्व अ अम् ('शेषे लोपः' - ७.२.९०)
- त्व अम् ('अतो गुणे' - ६.१.९७)
  - 'अमि पूर्वः' - ६.१.१०७ - परः, बहिर्भूत-अम्-प्रत्ययनिमित्तकत्वाद् बहिरङ्गः
  - 'अजाद्यतष्टाप्' - ४.१.४ - पूर्वः, अन्तर्भूत-स्त्रीत्व-अदन्तत्वनिमित्तकत्वाद् अन्तरङ्गः

- सत्यम् । अलिङ्गे युष्मदस्मदी, तेन स्त्रीत्वाभावात् न टाप् ।
- ‘साम आकम्’ इति सूत्रे भाष्ये पठितम् ।
- वस्तुतस्तु, अस्य भावः युष्मदस्मदोः स्त्रीत्वाभाव इति न, किन्तु पुंस्त्रीनपुंसक-पदान्तर-समभिव्याहारं विना लिङ्गविशेषो युष्मदस्मच्छब्दाभ्यां न प्रतीयते इत्येतावदेव ।
- अतः समाधानान्तरं सूचयति,

- यद्वा, शेष इति सप्तमी स्थानिनः अधिकरणत्वविवक्षया, तेन मपर्यन्ताच्छेषस्य 'अद्' इत्यस्य लोपः ।
- 'शेषे लोपः' इति सूत्रे शेषपदस्य 'आत्व-यत्व-निमित्तेतर-विभक्तौ परतः' इत्यर्थः उक्तः ।
- तथा न, 'शेषस्य' इति वक्तव्ये अधिकरणत्वविवक्षया 'शेषे' इति उक्तम् । (विवक्षातः कारकाणि भवन्ति) ।
- एवञ्च, शेषस्य लोपः इत्यर्थः ।
- 'कस्माच्छेषस्य?' इति प्रश्ने, 'मपर्यन्तस्य' इति अपकृष्टं पञ्चम्यन्ततया विपरिणम्यते । मपर्यन्ताच्छेषस्य लोपः इत्यर्थः वक्तव्यः ।

- युष्मद्  (सु) स्
- युष्मद्  अम् (‘ङेप्रथमयोरम्’ - ७.१.२८)
- त्व  अद् अम्(‘त्वाहौ सौ’ - ७.२.९४)
- त्व      अम्  (‘शेषे लोपः’ - ७.२.९०)
- ननु, शेषे लोपः इत्यनेन ‘अद्’ इत्यस्य लोपे कृतेऽपि, त्व इत्यस्य अकारान्तत्वाद् टाब् भवत्येव किल इति चेत्,

- स च परोऽपि अन्तरङ्गे अतो गुणे कृते प्रवर्तते, अदन्तत्वाभावात् न टाप् ।
- युष्मद्  (सु) स्
- युष्मद्  अम् ('ङेप्रथमयोरम्' - ७.१.२८)
- त्व  अद् अम्('त्वाहौ सौ' - ७.२.९४)
  - 'अतो गुणे' - ६.१.९७ - पूर्वः, अन्तर्भूतनिमित्तकत्वाद् अन्तरङ्गः
  - 'शेषे लोपः' - ७.२.९० - परः, बहिर्भूतविभक्तिनिमित्तकत्वाद् बहिरङ्गः
- त्वद्      अम्('अतो गुणे' - ६.१.९७)
  - अधुना 'अन्तादिवच्च' इत्यनेन कृतस्य एकादेशस्य परादिवद्भावम् आश्रित्य 'शेषे लोपः' इत्यनेन 'अद्' इत्यस्य लोपः ।

- त्व्       अम्  (‘शेषे लोपः’ - ७.२.९०)
- अधुना अकारान्तत्वाभावात् न टाप् ।